ततोऽवनेजनद्व्यात् संस्मरन् गोत्रनामनी ॥
तिलसर्पिर्मधुक्षीरैः सम्बितं तत्तमेव हि ।
दद्यात् प्रेताय पिण्डन्तु दक्षिणाभिमुखस्थितः ॥
फलमूलगुड़क्षीरतिलमिश्रन्तु कुत्रचित् ।
अर्घैः पुष्पैस्तथा दीपैर्धूपैस्तोयैः सुशीतलैः ॥
ऊर्णातन्तुमयैः शुद्धैर्वासोभिः पिण्डमर्चयेत् ।
प्रयाति यावदाकाशं पिण्डाहासमयी शिखा ॥
तावत्तु संमुखस्तिष्ठेत् सर्व्वं तोये ततः क्षिपेत् ।
दिवसे दिवसे देयः पिण्ड एवं क्रमेण तु ॥
सद्यःशौचेऽपि दातव्याः सर्व्वेऽपि युगपत्तथा ।
त्र्याहाशौचे प्रदातव्याः प्रथमे त्वेक एव हि ॥
द्वितीयेऽहनि चत्वारस्तृतीये पञ्च चैव हि ।
एकस्तोयाञ्जलिस्त्वेवं पात्रमेकञ्च दीयते ॥
द्वितीये द्वौ तृतीये त्रीन् चतुर्थे चतुरस्तथा ।
पञ्चमे पञ्च षष्ठे षट् सप्तमे सप्त एव च ॥
अष्टमेऽष्टौ च नवमे नवैव दशमे दश ।
येन स्युः पञ्चपञ्चाशत्तोयस्याञ्जलयः क्रमात् ॥
तोयपात्राणि तावन्ति संयुक्तानि जलादिभिः ॥”
इति शुद्धितत्त्वम् ॥ * ॥
गयायामात्मपिण्डदानप्रमाणं यथा,—
“स्वकर्म्मधर्म्मयोगेन धनमुच्चावचं बहु ।
उपार्जयित्वा प्रययौ गयातीर्थमनुत्तमम् ॥
पिण्डनिर्व्वपणं तत्र प्रेतानामनुपूर्व्वशः ।
चकार स्वपितृणाञ्च दायादानामनन्तरम् ॥
आत्मनश्च महाबुद्धिर्महावेद्यां तिलैर्विना ।
पिण्डनिर्व्वपणं चक्रे तथान्येषाञ्च गोत्रिणाम् ॥
एवं प्रदत्तेष्वथ वै पिण्डेषु प्रेतभावतः ।
विमुक्तास्ते द्विज प्रेता ब्रह्मलोकं ततो गताः ॥”
इति वामने ७६ अध्यायः ॥

पिण्डकं, क्ली, (पिण्ड इव कायतीति । कै+कः ।) बोलम् । पिण्डमूलम् । इति राजनिर्घण्टः ॥ (गोलः । यथा, सुश्रुते शारीरस्थाने ३ अध्याये । “ तृतीये (मासि) हस्तपादशिरसां पञ्च पिण्डकानि निर्व्वर्त्तन्तेऽङ्गप्रत्यङ्गविभागश्च सूक्ष्मो भवति ॥”)

पिण्डकः, पुं, (पिण्ड इव कायतीति । कै+कः ।) सिह्लनामगन्धद्रव्यम् । इत्यमरः ।२।६।१२८॥ (बोलः । अस्य पर्य्यायो यथा,—
“विद्वान् गोलः पिण्डकश्च पिण्डो बोलो रसो रसः॥”
इति वैद्यकरत्नमालायाम् ॥) पिशाचः । इति त्रिकाण्डशेषः ॥ पिण्डालुः । इति राजनिर्घण्टः ॥ (अस्य गुणा यथा,—
“पिण्डको वातलः शीतो ग्राही दृष्यो महागुरुः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
पिण्ड+स्वार्थे कन् । कवलः । यथा, हरिवंशे । भविष्यपर्व्वणि । ९० । २१ ।
“पयःपानं तथा कुर्व्वन् भक्षयन् दधिपिण्डकम् ॥”)

पिण्डकन्दः, पुं, (पिण्डाकारः कन्दः ।) पिण्डालुः । इति राजनिर्घण्टः ॥ (पिण्डालुशब्देऽस्य विशेषो ज्ञातव्यः ॥)

पिण्डखर्ज्जूरः, पुं, (पिण्डवत् खर्ज्जूरः ।) स्वनामख्यातखर्ज्जूरः । तत्पर्य्यायः । राजजम्बूः २ पिण्डी ३ । इति जटाधरः ॥

पिण्डखर्ज्जूरी, स्त्री, (पिण्डखर्ज्जूर + स्त्रियां ङीष् ।) पिण्डखर्ज्जूरः । तत्पर्य्यायः । दीप्या २ स्वपिण्डा ३ मधुरस्रवा ४ फलपुष्पा ५ स्वादुपिण्डा ६ हयभक्ष्या ७ पिण्डखर्ज्जूरिका ८ । अस्या गुणाः । शैत्यत्वम् । हिमत्वम् । पित्तदाहार्त्तिश्वासभ्रमनाशित्वम् । वीर्य्यवृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
“पिण्डखर्ज्जूरिका त्वन्या सा देशे पश्चिमे भवेत् ।
खर्ज्जूरी गोस्तनाकारा परद्वीपादिहागता ॥
जायते पश्चिमे देशे सा छोहारेति कीर्त्यते ।
खर्ज्जूरीत्रितयं शीतं मधुरं रसपाकयोः ॥
स्निग्धं रुचिकरं हृद्यं क्षतक्षयहरं गुरु ।
तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भिशुक्रदम् ॥
कोष्ठमारुतहृद्बल्यं वान्तिवातकफापहम् ।
ज्वराभिघातक्षुत्तृष्णाकासश्वासनिवारकम् ॥
मदमूर्च्छामरुत्पित्तमद्योद्भूतगदान्तकृत् ।
महद्भिश्च गुणैरेभ्यः स्वल्पखर्जूरिका स्मृता ॥
खर्ज्जूरीतरुतोयन्तु मदपित्तकरं भवेत् ।
वातश्लेष्महरं रुच्यं दीपनं बलशुक्रकृत् ॥”
अथ पिण्डखर्ज्जूरीभेदः ।
“सुलेमानी तु मृदुला दलहीनफला च सा ।
सुलेमानी श्रमभ्रान्तिदाहमूर्च्छास्रपित्तहृत् ॥”
इति भावप्रकाशे पूर्व्वखण्डे १ भागे ॥

पिण्डगोसः, पुं, (पिण्डवत् संहतो गोसः ।) गन्धरसः । इत्यमरटीकायां रमानाथः ॥

पिण्डतैलकः, पुं, (पिण्डवत् तैलं यस्य । कप् ।) तुरुष्कः । इति राजनिर्घण्टः ॥

पिण्डदः, पुं, (पिण्डं ददातीति । दा+कः ।) पिण्डदानकर्त्ता । यथा,—
“लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम् ॥”
इति शुद्धितत्त्वम् ॥
अपि च ।
“शाङ्गेनेह परां सिद्धिं प्राप्यन्ते वारिणा नराः ।
पैत्राः पश्चात् क्रियाः कार्य्याः सर्व्वाश्चैवौर्द्धदेहिकाः ॥
क्रियां करोति यः पूर्व्वां पितृणां यश्च पिण्डदः ।
प्रायश्चित्तमचीर्णं तत् प्रायश्चित्ती भवेत्तु सः ॥”
इत्यग्निपुराणम् ॥

पिण्डपदं, क्ली, (पिण्डस्य संहतस्य पदम् ।) अङ्कविशेषः । यथा,—
“रूपाष्टकैर्विनिहतो भवनस्य बन्धः
कर्णैः स्वदन्त्रमिह युग्मशरैकनिघ्नम् ।
एकीकृतं रसनिशाकरयुग्मभक्त-
शेषं ततो भवति पिण्डपदं गृहस्य ॥
रूपाष्टकैरेकाशीत्या विनिहतः पूरितः भवनस्य बन्धः दीर्घप्रस्तारमिलितहस्ताः स्वदन्तं तत्संख्यानं युग्मशरैकनिघ्नं द्विपञ्चाशदुत्तरशतपूरितं एकीकृतं पूर्व्वाङ्केन मिलितं रसनिशाकरयुग्मभक्तशेषं षोड़शाधिकद्विशतहृतावशिष्टं तत् संख्यानं पिण्डपदसंज्ञं गृहस्य भवति ॥”
इति ज्योतिस्तत्त्वम् ॥

पिण्डपादः, पुं, (पिण्ड इव पादौ यस्य ।) हस्ती । इति त्रिकाण्डशेषः ॥

पिण्डपुष्पं, क्ली, (पिण्ड इव पुष्पं पुष्पगुच्छो यस्य ।) अशोकपुष्पम् । (क्वचित् पुं । यथा,—
“अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः ।
कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) जवापुष्पम् । पद्मपुष्पम् । इति मेदिनी । षे,२७॥ तगरपुष्पम् । इति शब्दरत्नावली ॥

पिण्डपुष्पकः, पुं, (पिण्डपुष्पमिव प्रतिकृतिः । “इवे प्रतिकृतौ ।” ५।३।९६। इति कन् ।) वास्तूकम् । इति शब्दमाला ॥ (वास्तूकशब्देऽस्य गुणादयो ज्ञातव्याः ॥)

पिण्डफला, स्त्री, (पिण्ड इव फलं यस्याः ।) कटुतुम्बी । इति जटाधरः ॥ (यथा,—
“छिन्नस्य विम्लापनमेव कुर्य्या-
दुलूखलोपलवेणुदण्डैः ॥
विकङ्कतारग्वधकाकजम्बू
काकादनीतापसवृक्षमूलैः ।
आलेपयेत् पिण्डफलार्कभार्गी
करञ्जकालामदनैश्च विद्वान् ॥”
इति सुश्रुते चिकित्सितस्थानेऽष्टादशेऽध्याये ॥)

पिण्डबीजकः, पुं, (पिण्डवत् बीजानि यस्य । कप् ।) कर्णिकारवृक्षः । इति राजनिर्घण्टः ॥ (कर्णिकारशब्दे विवृतिरस्य ज्ञातव्या ॥)

पिण्डमुस्ता, स्त्री, (पिण्डवत् स्थूला मुस्ता ।) नागरमुस्ता । इति राजनिर्घण्टः ॥

पिण्डमूलं, क्ली, (पिण्डमिव मूलमस्य ।) गर्जरम् । मूलकभेदः । तत्पर्य्यायः । शताङ्कम् २ पिण्डकम् ३ पिण्डमूलकम् ४ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । गुल्मवातादिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

पिण्डलः, पुं, (पिड़ि संहतौ+बाहुलकात् कलच् ।) सेतुः । इति हारावली । १२९ ॥

पिण्डसः, पुं, (पिण्डेन परदत्तग्रासेन सनोति जीवतीति । सन+डः ।) भिक्षाशी । भिक्षोपजीवी । इति शब्दमाला ॥

पिण्डा, स्त्री, (पिण्ड+टाप् ।) पिण्डायसम् । कस्तूरीभेदः । सा कुलत्थिकातः कियत्स्थूला । इति राजनिर्घण्टः ॥ वंशपत्री । इति भावप्रकाशः ॥

पिण्डातः, पुं, (पिण्ड इव अतति सातत्यमनुकरोतीति । अत+अच् ।) सिह्लकः । इति रत्नमाला ॥

पिण्डाभ्रं, क्ली, (पिण्डवत् आभ्रं मेघजलसम्बन्धिद्रव्यम् ।) घनोपलः । इति शब्दमाला ॥

पिण्डायसं, क्ली, (पिण्डं संहतमायसम् ।) तीक्ष्णायसम् । इति राजनिर्घण्टः ॥

पिण्डारं, क्ली, (पिण्डं संहतमृच्छतीति । ऋ+“कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् ।) पल-